# संस्कृतवार्ता:

दिनाङ्क : 31.07.2025 सायम् - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- केन्द्रीयमन्त्रिमण्डलेन प्रधानमन्त्री-किसान-सम्पदा-योजनायाः कृते विंशत्यधिकपञ्चशतोत्तर-षड्सहस्रकोटि-रूप्यकाणां परिव्ययस्य अनुमोदनं कृतम् अस्ति।
- केंद्रीय-वाणिज्योद्योग-मंत्री पीयूष-गोयलः अकथयत् यत् सर्वकारः भारतीय-वस्तुसु अमेरिकया प्रख्यापितस्य पञ्चविंशति-प्रतिशन्मितस्य शुल्कस्य प्रभावस्य आकलनं करोति । भारतस्य हिताय यथोचितं निर्णयाः स्वीकरिष्यन्ते ।
- एन्. आई ए इति विशिष्ट-न्यायालयेन अद्य अष्टाधिक-द्विसहस्रतमाब्दे मालेगाँव्-विस्फोट-प्रकरणे भाजपा-दलस्य पूर्वसदस्या प्रज्ञा-सिंह्-ठाकुरः, लेफ्टिनेण्ट् कर्नल-प्रसाद-पुरोहितः , अन्ये च सर्वे सप्त अभियुक्ताः दोषमुक्ताः कृताः ।
- ऋतुविज्ञान-विभागः अद्य असम-मेघालय-प्रदेशयोः अत्यधिक-वर्षायाः पूर्वानुमानं प्रकटीकृतवान् ।
- लण्दन-नगरस्य ओवल-क्रीडाङ्गणे भारत-इङ्ग्लैण्ड-दलयोर्मध्ये अन्तिमा टेस्ट-क्रिकेट-क्रीडा प्रचलति ।

---

<u>मन्त्रिमण्डलम्</u>

केन्द्रीयमन्त्रिमण्डलेन पञ्चदशतमस्य वित्तायोगचक्रस्य कालखण्डे प्रचलितायाः"प्रधानमन्त्री किसान-संपदा-योजना" इति केन्द्रीयक्षेत्रयोजनायाः कृते विंशत्यधिक-नवशतोत्तरैक-सहस्रकोटिरूप्यकाणां अतिरिक्तव्ययेन सह विंशत्यधिकपञ्चशतोत्तर-षड्सहस्रकोटि-रूप्यकाणां परिव्ययस्य अनुमोदनं कृतम् अस्ति। अद्य अपराह्णे नवदिल्ल्यां वार्ताहरैः सह भाषमाणः सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत्, एकीकृतशीत-शृङ्खला तथा मूल्यवर्धन-

अवसंरचनायाः अन्तर्गतं पञ्चाशत् बहूत्पादखाद्य-विकिरण-घटकानां स्थापनार्थं एकसहस्रकोटिरूप्यकाणां साहाय्यम् अनुमोदितम् अस्ति ।

-------------------------------------------

**प्रधानमन्त्री-कृषकनिधिः**

प्रधानमन्त्री-किसान-सम्मान-निधि इत्यस्याः योजनायाः विंशतितमा निधिः कृषकेभ्यः शनिवासरं प्रदास्यते । अस्मिन् विषये कृषि-कृषक-कल्याण-मन्त्रिणः शिवराज-सिहं-चौहान इत्यस्य आध्यक्षे ह्यः नवदिल्ल्याम् उच्च-स्तरीयोपवेशनम् अभवत्। सभायां कार्यक्रमस्य सज्जतायाः समीक्षा कृता तथा च अधिकाधिकेभ्यः कृषकेभ्यः योजनायाः अस्याः लाभः प्रयच्छेत् इति सुनिश्चितम् अभवत् । अस्य कार्यक्रमस्य शुभारम्भः उत्तरप्रदेशस्य वाराणसीजनपदे प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे भविष्यति। सभायां, श्री. चौहानः राष्ट्रिय-राज्य-मण्डल-ग्राम-स्तराणां कृषकान् अनेन कार्यक्रमेण योजयितुं अधिकारिभ्यः निर्देशं दत्तवान्।

-------------------------------------------

**स्थगनम्**

बिहारे मतदातृ-सूच्याः विशिष्ट-गहन-संशोधने चर्चायाः याचनाम् अधिकृत्य विपक्षिदलानां विरोध-प्रदर्शनानन्तरम् अद्य द्वयोः सदनयोः कार्याचरणस्य स्थगनं बहुवारं सञ्जातम् । लोकसभा द्विवारं राज्यसभा च त्रिवारं स्थिगिते जाते , अन्ते च एते पूर्णदिवसाय स्थगिते । द्वितीयस्थगनानन्तरं यदा लोकसभायाः उपवेशनं सायं चतुर्वादने अभवत् तदा , केंद्रीय-वाणिज्योद्योग-मंत्री पीयूष-गोयलः अकथयत् यत् सर्वकारः भारतीय-वस्तुसु अमेरिकया प्रख्यापितस्य पञ्चविंशति-प्रतिशन्मितस्य शुल्कस्य प्रभावस्य आकलनं करोति ।सः प्रोक्तवान् यत् देशः राष्ट्रीयहितानां रक्षायै सर्वानपि आवश्यकान् पदक्षेपान् उत्थापयिष्यति सहैव कृषकैः, उद्यमिभिः, उद्योगनिकायैः, सर्वैः हितधारकैः च सह परामर्शं करिष्यति । श्रीगोयलस्य वक्तव्यानन्तरम् अपि विरोध-प्रदर्शनानि उद्दिश्य सदनं पूर्णदिवसाय स्थगितम् अभवत् ।

------------------------------------------

## मालेगाँव-विस्फोटकानि

मुम्बय्याः एन्. आई ए इति विशिष्ट-न्यायालयेन अद्य अष्टाधिक-द्विसहस्रतमाब्दे मालेगाँव्-विस्फोट-प्रकरणे भाजपा-दलस्य पूर्वसदस्या प्रज्ञा-सिंह-ठाकुरः, लेफ्टिनेण्ट् कर्नल-प्रसाद-पुरोहितः , अन्ये च सर्वे सप्त अभियुक्ताः दोषमुक्ताः कृताः । एन्. आई ए इति विशिष्ट-न्यायालयः स्वकीये निर्णये अवदत् यत् अभियोजनपक्षः "प्रकरणं निरूपयितुं असफलः अभवत्" तथा च अभियुक्ताः "संशयस्य लाभाय योग्याः" सन्ति । न्यायालयः अवदत् यत् (यू. ए. पी. ए.) इति असंवैधानिक-क्रियाकलाप-निवारण-अधिनियमस्य उपबन्धाः अस्मिन् प्रकरणे न उपयुज्यन्ते । न्यायालयेन महाराष्ट्र-सर्वकाराय अपि निर्देशः दत्तः यत् मृतानां प्रत्येकस्मै परिवाराय द्वि-लक्षरूप्यकाणां क्षतिपूर्ति-राशिः प्रदातव्या अपि च घटनायां व्रणितेभ्यः पञ्चाशत्-सहस्र-रूप्यकाणां क्षतिपूर्ति-राशिः दातव्या । अवधेयं यत् अष्टाधिक-द्विसहस्रतमाब्दे सितम्बर-मासस्य नवविंशति-दिनाङ्के मालेगाँव इत्यत्र मस्जिदस्य समीपे मोटरसाईकिल-यानेन बद्धस्य विस्फोटक-यन्त्रस्य विस्फोटनेन षट् जनाः मारिताः, पञ्चनवति-जनाः च व्रणिताः अभवन् । वार्ताहरैः सह वार्तां कुर्वन् अभियुक्तस्य अधिवक्ता रञ्जीत-नायरः इत्यसौ अवदत् यत् अभियोजनपक्षः अभियुक्तस्य विरुद्धं आरोपाणां निरूपणे असफलः अभवत् ।

------------------------------------------

## उपसेनाध्यक्ष-सेवानिवृत्तिः

उपसेनाध्यक्षः लेफ्टिनेण्ट् जनरल् एन्. एस्. राजा-सुब्रमणि अद्य स्वकीयात् पदात् सेवानिवृत्तः अभवत्। सेवावसानं प्राप्य, सः ऊनत्रिंशत-वर्षाणि यावत् विस्तृतं सुप्रसिद्धं सैन्यजीवनं चिह्नितम् अकरोत् । सैन्य-गणवेशे श्री सुब्रह्मण्यस्य विशिष्टयात्रा राष्ट्रिय-रक्षा-अकादम्यां

आरब्धा, सः पञ्चाशीत्यधिकैकशत-तमे वर्षे दिसम्बर-मासे द-गढ्वाल-रैफल्स्  इत्यस्मिन् नियुक्तः अभवत् ।

-----------------------------------------

ऋतुविज्ञान-विभागः

ऋतुविज्ञान-विभागः अद्य असम-मेघालय-प्रदेशयोः अत्यधिक-वर्षायाः पूर्वानुमानं प्रकटीकृतवान् । आगामिषु षट्-सप्त-दिवसेषु  पूर्वोत्तरभारते प्रचण्डवृष्टेः विभागेन नारङ्गवर्णीया सञ्चेतना प्रदत्ता अस्ति। एतदतिरिच्य, अद्य राजस्थानस्य उपरि प्रचण्डवृष्ट्याः नारङ्गवार्णिकी सञ्चेतना अपि प्रदत्ता अस्ति। आकाशवाणी-समाचारः इत्यनेन सह वार्तालापं कुर्वन्, विभागस्य वरिष्ठः वैज्ञानिकः आर्. के. जेनामणिः अवदत् यत्, आगामिषु दिनेषु पूर्वोत्तरप्रदेशे तीव्रवृष्टिः भवितुम् अर्हति, राजस्थान-मध्यप्रदेशयोः  वर्षा श्वारभ्य न्यूनीभविष्यति ।

-----------------------------------------

प्रधानमन्त्री-उधमसिंहः

अद्य राष्ट्रम् स्वस्मै महते क्रान्तिकारिणे स्वातन्त्र्ययोद्धृणे हुतात्मने उधम-सिहंः इत्यस्मै तस्य षडशीतितमस्य बलिदानदिवसस्य अवसरे श्रद्धाञ्जलिम् अर्पयति । प्रधानमन्त्री नरेन्द्रमोदी भारतमातुः अमरपुत्राय श्रद्धाञ्जलिम् अयच्छत्, तस्य देशभक्तेः शौर्यस्य च कथाः देशवासिनां कृते सर्वदा प्रेरणास्रोतांसि भविष्यन्ति इति अपि अकथयत् ।

-----------------------------------------

प्रधानमन्त्री-यूएई-राष्ट्रपतिः

प्रधानमन्त्रिणा नरेन्द्र-मोदिना संयुक्त-अरब-अमीरात इत्यस्य  राष्ट्रपतिना  शेख-मोहम्मद-बिन-जायद-अल-नाहयान इत्यनेन सह दूरभाषयन्त्रेण सम्वादः कृतः । एकस्मिन् वक्तव्ये, प्रधानमन्त्री-कार्यालयः अवदत् यत् उभौ नेतारौ भारत-यू. ए. ई. देशयोः मध्ये द्विपाक्षिक-व्यापक-सामरिक-

सहभागित्वस्य सुदृढीकरणाय परस्पर-प्रतिबद्धतां पुनः सुदृढीकृतवन्तौ । सः अवदत् यत् तौ द्विपाक्षिकसहयोगस्य विविधक्षेत्रेषु कृतानां उल्लेखनीयप्रगतीनां सकारात्मकरूपेण मूल्याङ्कनं कृतवन्तौ अपि च द्वयोः देशयोः जनानां परस्पर-लाभाय सहयोगं विकसितुं, सुदृढं कर्तुं च बलं प्रायच्छताम् ।

------------------------------------------

## फिलिपींस-राष्ट्रपतिः-भारतयात्रा

फिलिपिन्स देशस्य राष्ट्रपतिः फर्डिनेण्ड् आर मार्कोस् इत्येषः अगस्तमासस्य चतुर्थदिनाङ्कात् भारतस्य पञ्चदिवसीयायां राजकीययात्रायां भविष्यति। मार्कोस् इत्यनेन सह फिलिपीन्स देशस्य प्रथममहिला लुईस्-अरनेटा-मार्कोस्, तथा च उच्चस्तरीय-प्रतिनिधिमण्डलम् अपि आगमिष्यति यस्मिन् मन्त्रिमण्डलस्य अनेके मन्त्रिणः वरिष्ठाधिकारिणः च भवष्यन्ति । यात्रावधौ फिलिपिन्स् देशस्य राष्ट्रपतिः मार्कोस् इत्येषः प्रधानमन्त्री नरेन्द्रमोदी च अगस्तमासस्य पञ्चमे दिनाङ्के द्विपक्षीयोपवेशनं करिष्यतः। श्रीमार्कोस: राष्ट्रपतिपदासीनया द्रौपदीमुर्मु-वर्यया सहापि मेलनं विधास्यति । यात्रावधौ विदेशमन्त्री डॉ. एस.जयशंकरः राष्ट्रपतिमार्कोस् इत्यनेन सह मिलिष्यति। श्रीमार्कोस: बेङ्गलूरुनगरं अपि गमिष्यति, तत्पश्चात् अगस्तमासस्य अष्टमे दिनाङ्के स्वकीयदेशं प्रति गमिष्यति।

------------------------------------------

## क्रिकेट्

क्रिकेट्-क्रीडायां भारतेन लण्दन-नगरस्य ओवल-क्रीडाङ्गणे पञ्च-क्रीडाभूतायाः एण्डर्सन्-तेण्दुलकर-टेस्ट-श्रृङ्खलायाः अन्तिमस्य निर्णायकद्वन्द्वस्य प्रथमदिने इङ्ग्लैण्ड्-दलं विरुद्ध्य भोजनावकाशं यावत् द्वयोः क्रीडकयोः हानौ द्वि-सप्ततिः धावनांकाः समर्जिताः ।पूर्वं इंग्लैंड-दलेन पणकं विजित्य क्षेत्ररक्षणस्य विकल्पः स्वीकृतः।

।।इति वार्ता।।